"ततो महीतलं तात क्षत्रियैर्यदृच्छया ।
खनताधिगतं वित्तं केनचिद्भृगुवेश्मनि ॥
तद्वित्तं ददृशुः सर्व्वे समेताः क्षत्रियर्षभाः ।
अवमन्य ततः क्रोधाद्भृगूंस्तांश्शरणागतान् ॥
निजघ्नुः परमेष्वासाः सर्व्वांस्तान्निशितैः शरैः ।
आगर्भादवकृन्तन्तश्चेरुः सर्व्वां वसुन्धराम् ॥
तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा ।
भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे ॥
तासामन्यतमा गर्भं भयाद्दध्रे महौजसम् ।
ऊरुणैकेन वामोरुर्भर्त्तुः कुलविवृद्धये ॥
तद्गर्भमुपलभ्याशु ब्राह्मणी या भयार्द्दिता ।
गत्वैका कथयामास क्षत्रियाणामुपह्वरे ॥
ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः ।
ददृशुर्ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा" ॥
"अथ गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह ।
मुष्णन् दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः ॥
ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः" ॥

अयमौर्व्वस्तु पितृवधामर्षात् क्षत्रियवधे कृतप्रतिज्ञ उग्रे तपसि वर्त्तमानः पितृभिर्निवारितः । ततो यथाप्रतिज्ञो नाहं भवितुमुत्सहे इति जातशङ्कः अमोघत्वाच्च क्रोधवह्नेः पितॄनुक्तवान् । यथा तत्रैव १८१ अध्याये ।

"यस्मायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति ।
दहेदेष च मामेव निगृहीतः स्वतेजसा ॥
भवताञ्च विजानामि सर्व्वलोकहितेप्सुताम् ।
तस्माद्विधध्वं यच्छ्रेयो लोकानां मम चेश्वराः ॥
पितर ऊचुः ।
य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति ।
अप्सु तं मुञ्च भद्रन्ते लोका ह्यप्सु प्रतिष्ठिताः ॥
आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत् ।
तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥
अयं तिष्ठतु ते विप्र यदिच्छसि महोदधौ ।
मन्युजोऽग्निर्दहन्नापो लोका ह्यापोमयाः स्मृताः ॥
एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति ।
न चैवं समरा लोका गमिष्यन्ति पराभवम् ॥
वशिष्ठ उवाच ।
ततस्तं क्रोधजं तात और्व्वोऽग्निं वरुणालये ।
उत्ससर्ज्ज स चैवाप उपयुङ्क्ते महोदधौ ॥
महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः" ॥)

(उर्व्वस्यापत्यम् ।) पञ्चप्रवरान्तर्गतमुनिविशेषः । इति पुराणम् ॥

और्व्वेयः, पुं, (उर्व्वश्याः अपत्यम् । उर्व्वशी + ढक् ।) अगस्त्यमुनिः । इति हेमचन्द्रः ॥ (अस्य जन्मकथा पुराणेषूक्ता यथा,
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत् कुम्भे न्यपतद्वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च द्वावृषी संबभूवतुः" ॥
उर्व्वशीगर्भजाताः पुरूरवसः सप्त पुत्राः । तत्कथा हरिवंशे २५ अध्याये द्रष्टव्या ॥)

औलूकं, क्ली, (उलूकानां समूहः । अण् ।) उलूकसमूहः । इति जटाधरः ॥ पेचार झाँक् इति भाषा ॥

औलूक्यः, पुं, (उलूकस्य मुनेरपत्यं पुमान् । उलूक + गर्गादित्वात् यञ् ।) वैशेषिकः । वैशेषिकदर्शनवेत्ता । इति हेमचन्द्रः ॥ (अयं खलु कणाद-इत्याख्यया प्रसिद्धः ॥)

औशीरं, क्ली, (उश्यते । वश् + ईरन् । प्रज्ञाद्यण् । ५ । ४ । ३८ । यद्वा उशीरस्येदं "तस्येदम्" । ४ । ३ । १२० । इत्यण् ।) शयनासनम् । इत्यमरः ॥ शयनं स्वापः शय्या वा आसनं पीठादि । शयनासनं समुदितमिति स्वामी । एकमिति सुभूतिः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते राजधर्म्मानुशासनपर्व्वणि १२ । ६० । ३१ ।
"छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे" ॥)
उशीरजम् । चामरम् । दण्डः । इति हेमचन्द्रः ॥

औशीरः, पुं, (उशीरस्यायम् । उशीर + अण् ।) चामरदण्डः । इत्यमरः ॥

औषणं, क्ली, (उषण + भावार्थे अण् ।) कटुरसः । उषणं मरीचं तस्य भावः ॥

औषधं, क्ली, (ओषधेरिदम् । ओषधिरेव वा "ओषधेरजातौ" ५।४ ३७। इत्यण् ।) रोगनाशकद्रव्यं । ओषधिभवं भवार्थे अण्प्रत्ययः । तत्पर्य्यायः । भेषजम् २ भैषज्यम् ३ अगदः ४ जायुः ५ । इत्यमरः ॥ जैत्रम् ६ आयुर्योगः ७ गदारातिः ८ अमृतम् ९ आयुर्द्रव्यम् १० । इति वैद्यकम् ॥
("शोधनं शमनञ्चेति समासादौषधं द्विधा ।
शरीरजानां दोषाणां क्रमेण परमौषधम् ॥
बस्तिर्विरेको वमनं तथा तैलं घृतं मधु ।
धीधैर्य्यात्मादिविज्ञानं मनोदोषौषधम्परम्" ॥
इति वाभटे सूत्रस्थाने । १ अध्याये ॥
"धन्वसाधारणे देशे समे सन्मृत्तिके शुचौ ।
श्मशानचैत्यायतनश्वभ्रवल्मीकवर्ज्जिते ॥
मृदौ प्रदक्षिणजले कुशरोहिषसंस्तृते ।
अफालकृष्टेऽनाक्रान्ते पादपैर्बलवत्तरैः ॥
शस्यते भेषजं जातं युक्तवर्णरसादिभिः ।
जन्त्वदग्धं दवादग्धमविदग्धञ्च वैकृतैः ॥
भूतैश्छायातपाम्बाद्यैर्यथाकालञ्च सेवितम् ।
अवगाढ़महामूलमुदीचीं दिशमाश्रितम् ॥
अथ कल्याणचरितः श्राद्धः शुचिरुपोषितः ।
गृह्णीयादौषधं सुस्थं स्थितं काले च कल्पयेत् ।
सक्षीरं तदसम्पत्तावनतिक्रान्तवत्सरम् ।
ऋते गुड़घृतक्षौद्रधान्यकृष्णाविड़ङ्गतः" ॥
इति तत्रैव कल्पस्थाने । ६ अध्याये ॥
"यथाविधं यथाशास्त्रं यथामिश्रननिर्णयम् ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥
औषधं ह्यनभिज्ञात नामरूपगुणैस्त्रिभिः ।
विज्ञातमपि दुर्य्युक्तमनर्थायोपपद्यते ॥
योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत् ।
भेषजं वापि दुर्य्युक्तं तीक्ष्णं सम्पद्यते विषम् ॥
तस्मान्न भिषजा युक्तं युक्तिबाह्येन भेषजम् ।
धीमता किञ्चिदादेयं जीवितारोग्यकाङ्क्षिणा ॥
कुर्य्यान्निपतितो मूर्द्ध्नि सशेषं वासवाशनिः ।
सशेषमातुरं कुर्य्यान्नत्वज्ञमतमौषधम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स एव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत्" ॥
इति चरके सूत्रस्थाने । १ अध्याये ॥

"करणं पुनर्भेषजम् । भेषजं नाम तद्यदुपकरणायोपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायान्तेभ्यः तद्द्विविधं व्यपाश्रयभेदात् । दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः एतच्चैव भेषजमङ्गभेदादपि द्विविधं । द्रव्यभूतमद्रव्यभूतञ्च । तत्र यदद्रव्यभूतं तदुपायाभिप्लुतम् । उपायो नाम भयदर्शन-विस्मापन-क्षोभण-हर्षण-भर्त्सन-वध-बन्ध-स्वप्न-संवाहनादिरमूर्त्तो भावः यथोक्ताः सिद्ध्युपायाश्च । यत्तु द्रव्यभूतं तद्वमनादिषु योगमुपैति ।

तस्यापीयं परीक्षा इदमेवं प्रकृत्या एवंगुणमेवं प्रभावमस्मिन् देशे जातमस्मिन्नृतौ एवं गृहीतमेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तन्दोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूच्चानेनानेन वा विशेषेण युक्तमिति" । इति च तत्रैव विमानस्थाने ८ अध्याये ॥

पर्य्यायान्तरञ्च चरकचिकित्सास्थाने । १ अः ।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत् ।
स्वस्थस्यौजस्करं किञ्चित्किञ्चिदार्त्तस्य रोगनुत् ॥
अभेषजञ्च द्विविधं बाधनं सानुबाधनम्" ।
तथा, सुश्रुते सूत्रस्थाने ३७ अध्याये यथा,—
"श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिकताभिरनुपहतामनूषरामभङ्गुरामदूरादेकां स्निग्धां प्ररोहवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमि-विष-शस्त्रातप-पवन-दहन-तोयसम्बाध-मार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढ़मूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषसामान्यं ॥

विशेषस्तु । तत्राश्मवती स्थिरा गुर्व्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा । स्निग्धा शीतला सन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाम्बुगुणभूयिष्ठा । नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाग्निगुणभूयिष्ठा । रूक्षा भस्मरासभवर्णा तनुवृक्षाल्पकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा । मृद्वी समा श्वभ्रवत्यव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा ॥

तत्र केचिदाहुराचार्य्याः । प्रावृट्-वर्षा-शरद्धेमन्त-वसन्त-ग्रीष्मेषु यथासङ्ख्यं मूल-पत्र-त्वक्-क्षीरसार-फलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येषु ऋतुषु आददीतामेयान्याग्नेयेष्वेवमव्यापन्नगुणानि